SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# श्रीपञ्चमीव्रतम् एकं समीक्षात्मकम् अध्ययनम्

**Dr. Basudeb Das**
PGT Sanskrit Teacher, Govt. of Bihar, Bihar, India
Email: basudebdas683@gmail.com

**Abstract:** "व्रियते इति व्रतम्" अर्थात् यस्य वरणम्, ग्रहणम्, अनुष्ठानमाचरणं वा क्रियते तत् व्रतमुच्यते। 'व्रत' शब्दस्य साधारणतः उपवास-नियम-संयम-संकल्प-धर्माचरणं-कर्तव्यकर्म-निषिद्धवस्तुवर्जनेत्यादयोबहवः अर्थाः सन्ति। 'व्रत' शब्दस्य निष्पत्तिः भ्वादि-स्वादि-क्र्यायादि-चुरादि-दिवादि गणेषु 'वृ' धातुना सह 'अतच्' प्रत्ययेन भवति। पाणिनिकृतः वार्तिकसूत्रे 'व्रत' शब्दः भोजनादीनां त्यागार्थे प्रदत्तोऽस्ति।"व्रताद् भोजनं तन्निवृत्योः।"[1] अत्र भोजनत्यागार्थे 'व्रत' शब्देन णिच् भवति। यथा— पयः शूद्रान्नं वा व्रतयति। अर्थात् पयोव्रतादि नाम पयोभुङ्क्ते। शूद्रान्नं व्रतयति नाम निषिद्धान्नं त्यजति। सामान्यतो विचारे क्रियमाणे व्रतशब्दस्य 'नियमः, पुण्यजनकमुपोषणादि, मधुमांसवर्जनादिनियमः, नियमसंग्रहणं, नियमपालनं, शास्त्रचोदितनियमाऽनुष्ठानम्'-इत्यादयः प्रतीतिविषयतामायान्त्यर्थाः। चतुर्षु वेदेषु व्रत शब्दः ऋग्वेदे सर्वाधिकवारं प्रयुक्तोऽस्ति। ऋग्वेदे प्रायः २२० वारं व्रतशब्दस्योल्लेखः वर्तते। यथा—"सुदानव आर्या व्रता विसृजन्तो अधि क्षमि।"[2]

श्रेष्ठदातारः देवताः भूलोके सर्वत्र विराजमानाः वर्तन्ते। तैः देवैः एव व्रतानां विस्तारः कृतोऽस्ति। अनेन मन्त्रेण प्रदीयते यत्— भूलोके व्रतादिकर्मणां विस्तारः देवैः कृतमस्ति। ऋग्वेदस्य पुरुषसूक्तेऽपि अस्मिन् विषये कथितम् यत्—"यज्ञेन यज्ञमयजन्त देवातानि धर्माणि प्रथमान्यासन्।"[3]

पूर्वे देवैः यज्ञेन यत् यज्ञं कृतं तस्मिन् काले ये विधयः याः पद्धतयश्चासन् ते विधयः एव मर्त्यलोके मनुष्याणां कृते धर्मरूपेण प्रचलिताः अभवन्। ऋग्वेदे व्रतस्य कर्मार्थकत्वं विवृतम्। भविष्यपुराणस्य ब्राह्मपर्वणि, उत्तरपर्वणि च विविधाः व्रताः तेषां माहात्म्यानि च वर्णितानि सन्ति। तेषु अन्यतममेव जन्माष्टमीव्रतः। व्रतस्यास्योल्लेखः बहुषु शास्त्रेषूपलभ्यते। मम शोधप्रबन्धे व्रतस्यास्य वर्णनं वर्तते।

**Keywords:** व्रतम्, भविष्यपुराणम्, श्रीपञ्चमी, तिथि, विधिः, माहात्म्यम्, चेति।

**भूमिका—** सामान्यतो विचारे क्रियमाणे व्रतशब्दस्य 'नियमः, पुण्यजनकमुपोषणादि, मधुमांसवर्जनादिनियमः, नियमसंग्रहणं, नियमपालनं, शास्त्रचोदितनियमाऽनुष्ठानम्'-इत्यादयः प्रतीतिविषयतामायान्त्यर्थाः। भविष्यपुराणे व्रतस्यावधारणा सम्यक् प्रदत्ता—

"सम्यकसाधनं कर्म कर्तव्यमधिकारिणा।
निष्कामेण महावीर काम्यं कामान्वितेन च।।"[4] इति।

पाणिनिकृतः वार्तिकसूत्रे 'व्रत' शब्दः भोजनादीनां त्यागार्थे प्रदत्तोऽस्ति।"व्रताद् भोजनं तन्निवृत्योः।"[5] अत्र भोजनत्यागार्थे 'व्रत' शब्देन णिच् भवति। यथा- पयः शूद्रान्नं वा व्रतयति। अर्थात् पयोव्रतादि नाम पयोभुङ्क्ते। शूद्रान्नं व्रतयति नाम निषिद्धान्नं त्यजति।"व्रियते इति व्रतम्" अर्थात् यस्य वरणम्, ग्रहणम्, अनुष्ठानमाचरणं वा क्रियते तत् व्रतमुच्यते। 'व्रत' शब्दस्य साधारणतः उपवास-नियम-संयम-संकल्प-धर्माचरणं-कर्तव्यकर्म-निषिद्धवस्तुवर्जनेत्यादयोबहवः अर्थाः सन्ति। 'व्रत' शब्दस्य निष्पत्तिः भ्वादि-स्वादि-क्र्यायादि-चुरादि-दिवादि गणेषु 'वृ' धातुना सह 'अतच्' प्रत्ययेन भवति। एतेषां

गणानुसारं वृणीते, वर्तते, वृत्यते, वर्तयति, वरति, वृणोति, वृणाति चेत्यादिनि धातुरूपाणि सन्ति। चतुर्षु वेदेषु व्रत शब्दः ऋग्वेदे सर्वाधिकवारं प्रयुक्तोऽस्ति। ऋग्वेदे प्रायः २२० वारं व्रतशब्दस्योल्लेखः वर्तते। यथा— "सुदानव आर्या व्रता विसृजन्तो अधि क्षमि।"[6]

श्रेष्ठदातारः देवताः भूलोके सर्वत्र विराजमानाः वर्तन्ते। तैः देवैः एव व्रतानां विस्तारः कृतोऽस्ति। अनेन मन्त्रेण प्रदीयते यत्— भूलोके व्रतादिकर्मणां विस्तारः देवैः कृतमस्ति। ऋग्वेदस्य पुरुषसूक्तेऽपि अस्मिन् विषये कथितम् यत्— "यज्ञेन यज्ञमयजन्त देवातानि धर्माणि प्रथमान्यासन्।"[7]

पूर्वे देवैः यज्ञेन यत् यज्ञं कृतं तस्मिन् काले ये विधयः याः पद्धतयश्चासन् ते विधयः एव मर्त्यलोके मनुष्याणां कृते धर्मरूपेण प्रचलिताः अभवन्। ऋग्वेदे व्रतस्य कर्मार्थकत्वं विवृतम्। सामवेदे व्रतशब्दस्योल्लेखः बहुशो न वर्तते। केषुचित् स्थानेषु 'व्रत' शब्दः व्रतधारीणामर्थे प्रदत्तोऽस्ति। सामवेदे सोमस्य कृते व्रतधारिशब्दः विवृतोऽस्ति— "अभिव्रतानि पवते पुनानो.......... सानो अव्ये।"[8]

अथर्ववेदे मानवानां जीवनशैलीनां विविधाः विषयाः आलोचिताः सन्ति। तेषु व्रतोस्योल्लेखः वर्तते। तस्मिन् कालेऽपि जनाः व्रतपालनं कृतवन्तः। तथोक्तम्—

"यस्य व्रतं पशवो यान्ति सर्वे यस्य व्रत उपतिष्टन्त आपः।
यस्य व्रते पुष्टपति र्निविष्टस्तं सरस्वन्तमवसे हवामहे।।"[9]

तैत्तिरीयोपनिषदि 'व्रत' शब्दः सदाचारणार्थे प्रयुक्तमस्ति। तत्र उकम्- "अन्नं न निन्द्यात् तद् व्रतम्।"[10] अत्र अन्नमेव जीवानामाधारः इत्युक्तम्। अन्नस्य निन्दा अवमानना च न कर्तव्या तद् व्रतम्। अन्नस्य धारणम अन्नस्य वर्धनं कर्तव्यं तद् व्रतम्। अन्नं न परचक्षित् तद् व्रतम्। गृहम् आगन्तुकेभ्यः अतिथिभ्यः प्रतिकूलमुत्तरं न दातव्यम् तद् व्रतम्।[11]

व्रतशब्देन सह संकल्पशब्दः घनिष्ठरूपेण युक्तः। अनेन कर्मणा इदम् इष्टं फलं साध्यते इत्येवंविषया बुद्धिः संकल्पः। मनुसंहितानुसारेण कामनायाः मूलं हि संकल्पम्। यागयज्ञ-व्रत-यमधर्मादि सर्वे संकल्पजाः। तथोक्तम्—

"सङ्कल्पमूलः कामो वै यज्ञा सङ्कल्पसम्भवाः।
व्रतानि यमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः।।"[12]

नियमस्वरूपा धर्मा अपि व्रताः इति मनुक्तेः स्वरसाद् एकादश्युपवासैकभक्तादिश्वपि व्रतत्वाभिधानान्न सङ्कल्पो व्रतम्, किन्तु संकल्पविषयतत्तत्कर्मैव तत्। अत एवाऽस्य संकल्पसम्भवत्वमपि। व्रतराजग्रन्थानुसारेण संकल्पमिति व्रतमुच्यते—

"अत्र केचित् स्वकर्तव्योविषयो नियतः संकल्पो व्रतमिति।"[13]

स्कन्दपुराणमुद्धृत्य व्रताधिकारिणः प्रसङ्गे व्रतराज इति ग्रन्थे कथितमस्ति—

"निजवर्णाश्रमाचारनियतः शुद्धमानसः।।
अलुब्धः सत्यवादी च सर्वभूतहिते रतः।।
व्रतेष्वधिकृतो राजन्नन्यथा विफलश्रमः। ।
श्रद्धावान्पापभीरुश्च मददम्भविवर्जितः।।
पूर्वम् निश्चयमाश्रित्य यथावत्कर्मकारकः।।
अवेदान्तिको धीमानधिकारी व्रतादिषु।।"[14]

अर्थात् स्ववर्णाश्रमधर्मेसदानिरतः, शुद्धचित्तः, अलुब्धः, सत्यवादी, सर्वभूतानां हिताय निरतश्च

मानवस्य हि केवलं व्रतेऽधिकारास्ति अन्यथा तत् वृथा परिश्रमं भवति। यः पुरुषः श्रद्धालुः, पापभीरुः, मदद्म्भादिविवर्जितः, वेदनिन्दापराङ्मुखः, धीमान् च तस्य सर्वेषु व्रतेषु अधिकारोऽस्ति।

व्रतानुष्ठानेषु चर्तुवर्णानामधिकारोऽस्ति। यज्ञ-दान-समाधि-व्रतोपासादीनां दुर्लभो मोक्षप्राप्तिर्भवति। कूर्मपुराणमुद्धृत्य व्रतराजेन विवृतम्—

"ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम।।
अर्चयन्ति महादेवं यज्ञदानसमाधिभिः।।
व्रतोपवासनियमैर्होम स्वाध्यायतर्पणैः।।
तेषां वै रुद्रसायुष्यं सामीप्यं चातिदुर्लभम्।।
सलोकता च सारूप्यं जायते तत्प्रसादतः।।"[15]

पी.वी.काणे महोदयस्य मतानुसारे व्रतानां त्रिविधं वर्गीकरणं कर्तुं शक्यते। तेनोक्तम्— "As the Vratas to be treated of in this section are almost all self-imposed or voluntary, they may be divided into three classes."[16] प्रथमप्रकारं वर्गीकरणं पद्मपुराणे प्राप्यते।[17] अस्य वर्गीकरणस्य आधारेण व्रतः त्रिविधः कथ्यते—

**मानसिकव्रतः—** यथा— अहिंसा, सत्यवादिता, व्रह्मचर्यम्, अस्तेयमिति।

**शारीरिकव्रतः—** पूर्णदिनोपवासः, दिने एकवारं भोजनम्, अयाचना विना अन्नखाद्यान्नं ग्रहणम् इत्यादयः।

**वाचिकव्रतः—** जपः, सत्यभाषममादि।

द्वितीयप्रकारस्य वर्गीकरणं व्रतकालस्याधारेण निर्धारितम्। यथा- दिवसव्रतः, पक्षव्रतः, मासव्रतः, ऋतुव्रतः, अयनव्रतः वर्षव्रतः वा। अग्निपुराणे अस्याधारेण व्रतानां वर्गीकरणं कृतमस्ति। तत्र तिथिव्रतः, प्रतिपदाव्रतः, द्वितीयाव्रतः, तृतीयाव्रतः, चतुर्थीव्रतः, पञ्चमीव्रतः, षष्ठीव्रतः, सप्तमीव्रतः, अष्टमीव्रतः, नवमीव्रतः, दशमीव्रतः, एकादशीव्रतः, द्वादशीव्रतः, त्रयोदशीव्रतः, चतुर्दशीव्रतः, पूर्णिमाव्रतः, वारव्रतः, नक्षत्रव्रतः, दिवसव्रतः, मासव्रतः चेति व्रतानां वर्गीकरणं दृश्यते।

तृतीयप्रकारस्य वर्गीकरणं साम्प्रदायिकतायाः आधारेण कृतमस्ति। यथा- गणेशव्रतः, शैवव्रतः, विष्णुव्रतादयः।[18]

**श्रीपञ्चमीव्रतः—** भविष्यपुराणे उत्तरपर्वसु वर्णितेषु व्रतेषु अन्यतममेव श्रीपञ्चमीव्रतः।

**तिथिः—** मार्गशीर्षस्य शुक्लपञ्चमी।

**विधिः—** व्रतोऽयं मार्गशीर्षमासस्य शुक्लपक्षपञ्चम्यामारभते। अस्मिन् दिवसे व्रतचारिणा व्रतचारिण्या वा प्रातरुत्थाय स्नानादिकर्म समाप्य पितृपुरुषाणाञ्च सन्तोषविधानादनन्तरं लक्ष्मीदेव्याः पूजा कर्तव्या। पद्मासना पद्महस्ता पद्मवर्णा पद्मनेत्रा अलंकृता सुवर्णकलसस्थितैः जलैः स्नाप्यमाना लक्ष्मीप्रतिमा सुवर्णेन रजतेन ताम्रेणारकूटेन काष्ठेन वा निर्मातव्या। अतः भगवत्याः लक्ष्म्याः अङ्गपूजा ऋतुकालोद्भूतेः पुष्पैः निम्नोक्तमन्त्रोचारणपूर्वकं कर्तव्या—

"ॐ चपलायै नमः"पादौ पूजयामि
"ॐ चञ्चलायै नमः" जानूनी पूजयामि
"ॐ कमलावासिन्यै नमः" कटिं पूजयामि
"ॐ ख्यात्यै नमः" नाभिं पूजयामि

"ॐ मन्मथवासिन्यै नमः" स्तनौ पूजयामि

"ॐ ललितायै नमः" भुजद्वयं पूजयामि

"ॐ उत्कण्ठितायै नमः" कण्ठं पूजयामि

"ॐ माधव्यै नमः" मुखमण्डलं पूजयामि

"ॐ श्रियै नमः" शिरः पूजयामि।

इत्येवं रूपेण लक्ष्मीदेव्याः चरणादारभ्यः मस्तकं यावत् प्रत्येकं अङ्गस्य पूजा कर्तव्या।अथ अङ्कुरितविविधधान्यानि विविधानि फलानि च लक्ष्मीदेव्यै निवेदयेत्। तदनन्तरं पुष्पकुङ्कमादिभिः सुशोभिताभ्यः सुवासिनीभ्यः रमणीयेभ्यः स्वादिष्टं सुमधुरं भोजनं प्रणतिं च विज्ञाय तासां सन्तोषविधानार्थमर्चनं कर्तव्यम्। ततः घृतपात्रेण संयुक्तं तण्डुलप्रस्थं कस्मैचित् ब्राह्मणाय प्रदाय 'श्रीशः सम्प्रीयताम्' इत्येवमुक्त्वा याचयेत्। ततः मौनव्रतावलम्बनपूर्वकं भोजनं कर्तव्यम्। अयं श्रीपञ्चमीव्रतः मार्गशीर्षमासस्य शुक्लपक्षपञ्तम्यां प्रारभ्य कार्तिकमासस्य शुक्लपक्षपञ्चम्याः समाप्तं यावत् कर्तव्यः। क्रमेण मार्गशीर्षमास्य शुक्लपक्षपञ्चम्यां श्रीपूजा, पौषमास्य शुक्लपक्षपञ्चम्यां लक्ष्मीपूजा, माघमास्य शुक्लपक्षपञ्चम्यां कमलापूजा, फाल्गुनमासस्य शुक्लपञ्चम्यां सम्पत्पूजा, चैत्रमासस्य शुक्लपक्षपञ्चम्यां रमापूजा, वैशाखमासस्य शुक्लपक्षपञ्चम्यां नारायणीपूजा, ज्येष्ठमासस्य शुक्लपक्षपञ्चम्यां पद्मापूजा, आषाढमासस्य शुक्लपक्षपञ्चम्यां धृतिपूजा, श्रावणमासस्य शुक्लपक्षपञ्चम्यां स्थितिपूजा, भाद्रवमासस्य शुक्लपक्षपञ्चम्यां पुष्टिपूजा, आश्विनमासस्य शुक्लपक्षपञ्चम्यां ऋद्धिपूजा, कार्त्तिकमासस्य शुक्लपक्षपञ्चम्यां सिद्धिपूजा च करणीया। पूजान्ते प्रीयताम् इत्युच्चारयेत्। अन्तिममासे कार्त्तिकमासे शुक्लपक्षपञ्चम्यां नवीनवस्त्रेण उत्तममण्डपं प्रतिष्ठाय गन्धपुष्पादिभिः अलंकृत्य तस्य अन्तःस्थितशय्यायां अष्टमुक्ता-नेत्रपट्ट-सप्तधान्य-रसधातु-पादुका-उपानह-छत्र-भोजन-आसन-प्रभृतिभिः पूजोपकरणैः सह लक्ष्म्याः मूर्त्तिं प्रतिष्ठापयेत्। ततः लक्ष्मीपूजायाः अनन्तरं वेदविदे सदाचारणसम्पन्नाय ब्राह्मणाय तानि सर्वाणि अष्टमुक्तादिपूजोपकरणानि सवत्सया धेन्वा सह प्रयच्छेत्। अथ यथाशक्ति ब्राह्मणेभ्यः भोजनदानं कृत्वा दक्षिणा दातव्या। अन्ते भगवत्याः लक्ष्म्याः ऋद्धिं प्राप्त्यर्थं प्रार्थयेत्—

"क्षीराब्धिमथनोद्भूतो विष्णोर्वक्षः स्थलालये।
सर्वकामप्रदे देवि ऋद्धिं यच्छ नमोऽस्तु ते।।"[19] इति।

उक्तञ्च स्मृतिचिन्तामणौ— माघशुक्लपञ्चम्यां सरस्वतीं लक्ष्मीञ्च पूजयेत्। यथा संवत्सरप्रदीपोधृतम्—

"पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः।।
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया।
तस्याः पूर्वाह्न एवेह कार्य्यः सारस्वतोत्सवः।।"

अत्र दिनेद्वयेऽपि पूर्वाह्नव्यापित्वे पूर्वदिने लक्ष्मीसरस्वतीपूजा कर्तव्या। अनध्याया तिथिरियम्। यथा श्रीदत्तोधृतम्—

"श्रीपञ्चम्यां लिखेन्नैव न स्वाध्यायः कदाचन्।
वाणीकोपवाप्नोति लिखने पठनेऽपि च।।"[20]

**फलश्रुतिः—** व्रतस्यास्य फलश्रुति यथा—

"एवं यः कुरुते पार्थ भक्त्या श्रीपञ्चमीव्रतम्।
तस्य श्रीर्भवने भाति कुलानामेकविंशतिः।।
नारी वा कुरुते या तु प्राप्यानुज्ञां स्वभर्तृतः।
सुभगा दर्शनीया च बहुपुत्रा च जायते।।
श्रीपञ्चमीव्रतमिदं दयितं मुरारेर्भक्त्या समाचरति पूज्यभृगोस्तनूजाम्।
राज्यं निजं स भुवि भव्यजनोपभोगान्भुक्त्वा प्रयाति भुवनं मधुसूदनस्य।।"[21]

यः अनेन विधिना एतत् श्रीपञ्चमीव्रतं पालयति, सः स्वस्य एकविंशतिकुलैः सह लक्ष्मीलोके विराजते। या सौभाग्यवती नारी एतद्व्रतमाचरति, सा सौभाग्यसौन्दर्यधनपुत्रादीन् लभते, पत्या समादृता च।

**उपसंहारः–** दुःखमये संसारे आनन्दस्य हेतोः उत्सवस्य आवश्यकतास्ति। "आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येवखल्विमानि भूतानि जायन्ते"[22] —इति श्रुतिवचनानुसारेण जीवाः आनन्दस्वरपापरमात्मान उत्पन्ना भवन्ति, आनन्दे विराजन्ते, आनन्दे हि विलीना भवन्ति। अस्य मन्त्रस्य सार्थकता व्रतोत्सवे विद्यते। महाकविकालिदासेन मानवस्य इयं भावना अभिज्ञानशकुन्तले प्रकटितम्- "उत्सवप्रियाः खलु मनुष्याः।"[23] भारतीय वाङ्मये मनोरञ्जनस्य साधनं भवति व्रतोत्सवः। भारतीयजनजीवनस्य एकम् अङ्गमस्ति व्रतम्। धर्मस्य यज्ञदानतपांसि त्रीणि प्रधानान्यङ्गानि अवश्यकर्तव्यत्वेन शास्त्रेषु निर्दिष्टानि सन्ति। एषां त्यागः कदापि नोचितः। यत एतानि त्रीणि मनीषिणामपि पावनानि कुर्वन्ति। अत उच्यते श्रीकृष्णेन अर्जुनं प्रति—

"यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।" इति।[24]

हिन्दुजातेःव्रतोत्सवेष्वेषां त्रयाणामेव समावेशो दृश्यते। अतो नियमितरूपेण व्रतोत्सवानुष्ठानस्य व्यवस्था हिन्दुसमाजे प्रवर्तते। भारतीय वाङ्मये व्रतस्य महत्वम् असामान्यम्। भारतीयसंस्कृतिः आनन्दवाहिनी, सर्वकल्याणकारिणी, मङ्गलमयी चास्ति। संस्कृतिप्रियभारते आवर्षम् अनेके व्रतोपव्रतोत्सवाः परिपालिताः भवन्ति। द्वादशमासेषु एकमपि मासं तथा न स्यात् यस्मिन् मासि कोऽपि व्रतोत्सवो न स्यात्। व्रतानुष्ठानेन राष्ट्रियैकता निर्वाह्यते। व्रतोत्सवाः सामाजिकोत्थाने अपि बहु सहायकाः भवन्ति। ब्रतोत्सवस्य यथा सांस्कृतिक-आध्यात्मिक-लाभो वर्तते तथैव सामाजिक-लाभोऽपि वर्तते। व्रतेन समाजस्य सर्वे स्तरे उन्नतिः भवति। व्रतपालनेन यम-नियमयोः धर्मोऽपि सम्यकरूपेण परिपाल्यते। "अहिंसा सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः।"[25] पुनः "शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः।"[26] व्रतराजः इति ग्रन्थे व्रतस्य सामान्यो धर्मविषये उक्तमस्ति यत्—

"क्षमा सत्यं दया दानं शौचमिन्द्रियं निग्रहः।
देवपूजाऽग्निहवनं सन्तोषः स्तेयवर्जनम्।।
सर्वव्रतेष्वयं धर्मः सामान्यो दशाधा स्थितः।।"[27]

अर्थात् क्षमा, सत्यं दया, दानं, शौचं, इन्द्रियनिग्रहो, देवपूजा, अग्निहवनं, सन्तोषः, अस्तेयम्चेति दश प्रत्येकं व्रतस्य सामान्यो धर्मः। धर्मसिन्धुः इति ग्रन्थेऽपि मतमिदं विद्यते। व्रतराजग्रन्थे पुनः उच्यते—

"ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम्।

व्रतेष्वेतानि चत्वारि चरितव्यानि नित्यशः।।"[28]

अर्थात् व्रतग्रहणसमये ब्रह्मचर्यं, अहिंसा, सत्यं, आमिषभोजनम् वर्जनं च आवश्यकम्। व्रतानामाचरणार्थं व्रतानुष्ठानकर्ता अहिंसा, सत्यं, दया, दानं, इन्द्रियनिग्रहः, पूजा, सन्तोषः, अस्तेयश्च इति दश धर्मैः अलंकृतो भवेत्। एते दश मानवगुणाः सर्वेषां व्रतानामनुष्ठानार्थमुपयोगिनः भवन्ति। तथा हि उक्तम् भविष्यपुराणे—

"क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः।
सूर्यपूजाग्निहवनं सन्तोषः स्तेयवर्जनम्।
सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः।
निःशेषमहं वक्ष्यामि मासान्मासव्रतं प्रति।।"[29]

अतः व्रतपालनेन यम-नियमादि धर्मस्य पालनं भवति। तेन विविधानि आध्यात्मिकफलानि लभ्यन्ते।

व्रतस्य वैज्ञानिकमाहात्म्यानिऽपि सन्ति। व्रतेन सह उपवासः अङ्गाङ्गिरूपेणः युक्तः। आध्यात्मिकं तथा वैज्ञानिकमुभयतः उपवासस्य भूमिका तात्पर्यपूर्णा। नियन्त्रिताहारक्रिया हि उपवासः। यदि विध्यनुसारं तथा निष्ठापूर्वकमुपवासः क्रियते तदा आत्मबलस्य वा संकल्पशक्तेश्च बृद्धिर्भवति। फलतः मनसि स्वात्त्विकं तथा सकारात्मिका विचारा जायन्ते। तेन मनुष्यः विविधेभ्यो मानसिकव्याधितः यथा—दुश्चिन्तातः, अवसादतः, हीनतादितः मुक्तिञ्च लभते। उक्तं च गीतायाम्—

"विषया विनिवर्तन्ते निहारारस्य देहिनः।"[30]

अर्थात् विषय-वासनातः निवृत्तेः परमं साधनं भवति उपवासः। महाभारतेऽपि उच्यते—

"ब्राह्मणेभ्यः परं नास्ति पावनं दिवि चेह च।
उपवासैस्ततथा तुल्यं तपकर्म न विद्यते।।"[31]

### Endnotes

1. वार्तिक- पा.सू. लवण-व्रत-वस्त्र-हल-कल कृत-तूस्तेभ्यो णिच्- ३/१/२१
2. ऋ.वे. १०/६५/११
3. ऋ.वे. १०/९०/१६
4. व्रतकोशः, पृष्ठा-३
5. वार्तिक- पा.सू. लवण-व्रत-वस्त्र-हल-कल कृत-तूस्तेभ्यो णिच्- ३/१/२१
6. ऋ.वे. १०/६५/११
7. ऋ.वे. १०/९०/१६
8. सा.वे.१११६
9. अ.वे.७/४०/१
10. तै.उ.३/७/१
11. तै.उ.३/१०/१
12. मनु.२/३
13. व्रतराजः, सम्पा-माधवाचार्यः, पृष्ठा-2
14. व्र.रा. पृष्ठा- ६
15. व्र.रा. पृष्ठा- ६
16. P.V. Kane, History of Dharma sastra, Vol. v, Part-1, Page-56

17. अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्कता। एतानि मानसान्याहुर्वतानि हरितुष्टये। एकभुक्तं तथा नक्तमुपवासमयाचितम्। इत्येवं कायिकं पुंसां व्रतमुक्तं नरेश्वरः। वेदस्याध्ययनं विष्णोः कीर्तन सत्यभाणम्। प.पु. (पा.ख.) ८४/४२-४४

18. "The Samayapradipa has a different mode of treatment, viz. that is begins with Gane-savratas ( i.e. vratas in which Ganesa is the deity), then with vratas in which the sun is diety, then Sivavratas, Visnuvratas and so on."P.V. Kane, History of Dharma sastra, Vol. v, Part-1, Page-57

19. भ. पु. उ. प.३७/५४
20. स्मृतिचिन्तामणिः, पृष्ठा-१७-१८
21. भ. पु. उ. प.३७/५६-५८
22. तै.उ.३/६
23. अ.श.६.९
24. गीता- १८/५
25. यो.द. सा.पा. ३०
26. यो.द. सा.पा. ३२
27. व्रतराजः, पृष्ठा-९
28. व्रतराजः, पृष्ठा-9
29. भ.पु.ब्रा.प. १६८/७-८
30. गीता- २/५९
31. द्र,- व्रत-उपवास के धार्मिक और वैज्ञानिक आधार, सम्पा-शशिकांत सदैव, पृष्ठा-60

## Bibliography


- अवधूतः, कालिकानन्दः (सम्पा), *उपनिषदसमग्रः*, गिरिजा लाइब्रेरी, कलकाता, 2021.
- आल्आमान, आव्दुलआयीयः(सम्पा) *वेदः* (बङ्गभाषानुवादसहितम्, पञ्चखण्डात्मकम्) हरफ प्रकाशनी, कलकाता, बङ्गाव्द 1385 .
- कालिदासस्य *अभिज्ञानशकुन्तलम्,* सम्पा. सत्यनारायणचक्रवर्ती, संस्कृतपुस्तक- भाण्डार, कलकाता, पञ्चमसंस्करण, 2008.
- काशीनाथोपाध्यायविरचितः *धर्मसिन्धुः,* व्या.-श्रीवशिष्टदत्तमिश्रः श्रीसुदास्वामीमिश्रः च, चौखम्भाप्रकाशनम्, वाराणसी, वि. सं. 2078.
- पतञ्जलेः *योगदर्शनम्,* सम्पा- स्वामीश्रीब्रह्मलीनमुनिः, चौखम्बासंस्कृतसिरिज आफिस, वाराणसी, वि.सं. 2027
- भट्टनीलकण्ठविरचितं *समयमयूखः (तृतीयखण्डः),* सम्पा- जगन्नाथरघुनाथघारपुरे, मुम्बई, प्रथमसंस्करणम्, 1927
- मनुना विरचितं *मनुस्मृतिः,* सम्पा- रामेश्वरभट्टः, चौखम्बा-संस्कृतप्रकाशनम्, दिल्ली, 2001.
- महर्षिव्यासदेवविरचितं *श्रीभविष्यमहापुराणम्* (भागत्रयम्), अनुवादकः- एस.एन. खण्डेलवालः, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, प्रथमसंस्करणम्, 2017.
- महर्षिव्यासदेवविरचितं *अग्निपुराणम्,* सम्पा.- बलदेवउपाध्यायः, चौखम्बासंस्कृतसीरीज्आफिस, वाराणसी, प्रथमसंस्करणम्, 1966.
- महर्षिव्यासदेवविरचितं *श्रीमद्भागवद्गीता,* सम्पा-स्वामीभावघनानन्दः, उद्बोधनकार्यालयः, कलकाता, द्वितीयसंस्करणम्, 2003

- माधवाचार्यविरचितं *कालमाधवः*, सम्पा- श्रीकृष्णदासात्मज-गङ्गाविष्णोः, लक्ष्मीवेङ्कटेश्वरमुद्राणालयः, मुम्बई, संवत् 1973
- शर्मा, विश्वनाथः, *श्रीव्रतराजः*, खेमराजश्रीकृष्णदासप्रकाशनम्, बम्बई, नवंबरसंस्करणम्, 2020.
- सदैव, शशीकांतः, *व्रत-उपवास के धार्मिक और वैज्ञानिक आधार(हिन्दीभाषया),* नई दिल्ली, प्रभातपेपरबैक्स, प्रथमसंस्करणम्, 2019.
- सिंहः, यशवीरः, *तिथिव्रतविमर्शः*, दिल्ली, अभिषेकप्रकानम्, प्रथमसंस्करणम्, 2010.
- होशिङ्गः, जगन्नाथशास्त्री, *व्रतकोशः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम्, 1999.
- P.V.Kane, *History of Dharmasastra*, Vol. V, Pt.1, Bhandarkar Oriental Research Institute, Poona, 1958.

——